श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ त्रयोविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोविंशः सर्गः ॥

## भयङ्करानुत्पातान् दृष्ट्वापि तानचिन्तयित्वा खरस्य राक्षससेनायाश्च श्रीरामस्याश्रमसमीपे गमनम्

तत्प्रयातं बलं घोरमशिवं शोणितोदकम्।
अभ्यवर्षन्महाघोरस्तुमुलो गर्दभारुणः॥ **3.23.1** ॥

निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः।
समे पुष्पचिते देशे राजमार्गे यदृच्छया॥ **3.23.2** ॥

श्यामं रुधिरपर्यन्तं बभूव परिवेषणम्।
अलातचक्रप्रतिमं प्रतिगृह्य दिवाकरम्॥ **3.23.3** ॥

ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम्।
समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः॥ **3.23.4** ॥

जनस्थानसमीपे च समाक्रम्य खरस्वनाः।
विस्वरान् विविधान् नादान् मांसादा मृगपक्षिणः॥ **3.23.5** ॥

व्याजह्रुरभिदीप्तायां दिशि वै भैरवस्वनम्।
अशिवं यातुधानानां शिवा घोरा महास्वनाः॥ **3.23.6** ॥

प्रभिन्नगजसङ्काशास्तोयशोणितधारिणः।
आकाशं तदनाकाशं चक्रुर्भीमाम्बुवाहकाः॥ **3.23.7** ॥

बभूव तिमिरं घोरमुद्धतं रोमहर्षणम्।
दिशो वा प्रदिशो वापि सुव्यक्तं न चकाशिरे ॥ **3.23.8** ॥

क्षतजार्द्रसवर्णाभा सन्ध्या कालं विना बभौ।
खरं चाभिमुखं नेदुस्तदा घोरा मृगाः खगाः ॥ **3.23.9** ॥

कङ्कगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः।
नित्याशिवकरा युद्धे शिवा घोरनिदर्शनाः ॥ **3.23.10** ॥

नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः।
कबन्धः परिघाभासो दृश्यते भास्करान्तिके ॥ **3.23.11** ॥

जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः।
प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद् दिवाकरः ॥ **3.23.12** ॥

उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः।
संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः ॥ **3.23.13** ॥

तस्मिन् क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः।
उद्धूतश्च विना वातं रेणुर्जलधरारुणः ॥ **3.23.14** ॥

चीचीकूचीति वाश्यन्त्यो बभूवुस्तत्र सारिकाः।
उल्काश्चापि सनिर्घोषा निपेतुर्घोरदर्शनाः ॥ **3.23.15** ॥

प्रचचाल मही चापि सशैलवनकानना।
खरस्य च रथस्थस्य नर्दमानस्य धीमतः ॥ **3.23.16** ॥

प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत।
सास्रा सम्पद्यते दृष्टिः पश्यमानस्य सर्वतः ॥ **3.23.17** ॥

ललाटे च रुजो जाता न च मोहान्न्यवर्तत।
तान् समीक्ष्य महोत्पातानुस्थितान् रोमहर्षणान् ॥ **3.23.18** ॥

अब्रवीद् राक्षसान् सर्वान् प्रहसन् स खरस्तदा।
महोत्पातानिमान् सर्वानुत्थितान् घोरदर्शनान्॥ **3.23.19** ॥

न चिन्तयाम्यहं वीर्याद् बलवान् दुर्बलानिव।
तारा अपि शरैस्तीक्ष्णैः पातयेयं नभस्तलात्॥ **3.23.20** ॥

मृत्युं मरणधर्मेण सङ्क्रुद्धो योजयाम्यहम्।
राघवं तं बलोत्सिक्तं भ्रातरं चापि लक्ष्मणम्॥ **3.23.21** ॥

अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे।
यन्निमित्तं तु रामस्य लक्ष्मणस्य विपर्ययः॥ **3.23.22** ॥

सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः।
न क्वचित् प्राप्तपूर्वो मे संयुगेषु पराजयः॥ **3.23.23** ॥

युष्माकमेतत् प्रत्यक्षं नानृतं कथयाम्यहम्।
देवराजमपि क्रुद्धो मत्तैरावतगामिनम्॥ **3.23.24** ॥

वज्रहस्तं रणे हन्यां किं पुनस्तौ च मानवौ।
सा तस्य गर्जितं श्रुत्वा राक्षसानां महाचमूः॥ **3.23.25** ॥

प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता।
समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः॥ **3.23.26** ॥

ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः।
समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः॥ **3.23.27** ॥

स्वस्ति गोब्राह्मणेभ्यस्तु लोकानां ये च सम्मताः।
जयतां राघवो युद्धे पौलस्त्यान् रजनीचरान्॥ **3.23.28** ॥

चक्रहस्तो यथा विष्णुः सर्वानसुरसत्तमान्।
एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः॥ **3.23.29** ॥

जातकौतूहलास्तत्र विमानस्थाश्च देवताः।
ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम्॥ **3.23.30** ॥

रथेन तु खरो वेगात् सैन्यस्याग्राद् विनिःसृतः।
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः॥ **3.23.31** ॥

दुर्जयः करवीराक्षः परुषः कालकार्मुकः।
हेममाली महामाली सर्पास्यो रुधिराशनः॥ **3.23.32** ॥

द्वादशैते महावीर्याः प्रतस्थुरभितः खरम्।
महाकपालः स्थूलाक्षः प्रमाथस्त्रिशिरास्तथा।
चत्वार एते सेनाग्रे दूषणं पृष्ठतोऽन्वयुः॥ **3.23.33** ॥

सा भीमवेगा समराभिकामा
महाबला राक्षसवीरसेना।
तौ राजपुत्रौ सहसाऽभ्युपेता
माला ग्रहाणामिव चन्द्रसूर्यौ॥ **3.23.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रयोविंशः सर्गः॥